ॐ

श्रीराम



# श्रीरामरक्षास्तोत्रम्

## विनियोगः

ॐ अस्य श्रीरामरक्षास्तोत्र मंत्रस्य बुधकौशिक ऋषिः । श्री सीतारामचंद्रो देवता । अनुष्टुप् छन्दः । श्री सीता शकितः । श्रीमद् हनुमान कीलकम् । श्री रामचन्द्र प्रीत्यर्थे रामरक्षास्तोत्र जपे विनियोगः ।

## ध्यानम्

ध्यायेदाजनुबाहुं धृतशरधनुषं बध्धपदमासनस्थम् ।
पीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम् ॥
वामांकारुढसीता मुखकमलमिलल्लोचनं नीरदाभं ।
नानालंकारदीपतं दधतमुरुजटामंडलं रामचंद्रम् ॥

## स्तोत्रम्

चरितं रघुनाथस्य शतकोटि प्रविस्तरम् ।
अेकैकमक्षरं पुंसां महापातक नाशनम् ॥ 1 ॥

ध्यातवा नीलोतपलश्यामं रामं राजीव लोचनम् ।
जानकीलक्ष्मणोपेतं जटा मुकुट मंडितम् ॥ 2 ॥

सासितूणधनुर्वाण पाणिं नकतं चरांतकम् ।
स्वलीलया जगत्त्रातु माविर्भूतमजं विभूम् ॥ 3 ॥

रामरक्षां पठेतप्राज्ञः पापघ्नीं सर्वकामदाम् ।
शिरो मे राधवः पातु भालं दशरथात्मजः ॥ 4 ॥

कौशल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती ।
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ॥ 5 ॥

जिहवां विद्यानिधिः पातु कंठं भरतवंदितः ।
स्कंधौ दिव्यायुधः पातु भुजै भग्नेशकार्मुकः ॥ 6 ॥

करौ सीतापतिः पातु हृदयं जामदग्नजित् ।
मध्यं पातु खरध्वंसी नाभिं जांववदाश्रयः ॥ 7 ॥

सुग्रीवेशः कटी पातु सकिथनी हनुमतप्रभुः ।
ऊरु रधूत्तमः पातु रक्षः कुलविनाशकृत् ॥ 8 ॥

जानुनी सेतुकृतपातु जंघे दशमूखान्तकः ।
पादौ विभीषणश्रीदः पातु रामो अखिलं वपुः ॥ 9 ॥

ऐतां रामवलोपेतां रक्षां यः सुकृती पठेत् ।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ॥ 10 ॥

पाताल भूतल व्योम् चारिणश्छदमचारिणः ।
न द्रष्टुमपि शकतास्ते रक्षितं रामनामभिः ॥ 11 ॥

रामेति रामभद्रेति रामचंद्रेति वा स्मरन् ।
नरो न लिपयते पापौर्भुकितं मुकितं च विन्दति ॥ 12 ॥

जगत जैत्रैक मंत्रेण राम नाम्नाभि रक्षितम् ।
यः कंठे धारयेत्तस्य करस्थाः सर्वेसिध्धयः ॥ 13 ॥

वज्र पंजरनामेदं यो रामकवचं स्मरेत् ।
अव्याहताज्ञः सर्वत्र लभते जयमंगलम् ॥ 14 ॥

आदिष्टवान्यथा स्वपने रामरक्षामिमां हरः ।
तथा लिखितवान्प्रातः प्रवुध्धो बुधकौशिकः ॥ 15 ॥

आरामः कल्पवृक्षाणां विरामः सकलापदाम् ।
अभिरामस्त्रिलोकानां रामः श्रीमान्स नः प्रभुः ॥ 16 ॥

तरुणौ रुपसंपन्नौ सुकुमारौ महावलौ ।
पुंडरीक विशालाक्षौ चीरकृष्णाजिनाम्वरौ ॥ 17 ॥

फलमुलाशिनौ दान्तौ तापसौ व्रहमचारिणौः ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥ 18 ॥

शरण्यौ सर्वसत्त्वानां श्रेष्ठो सर्वधनुष्मताम् ।
रक्षः कुलनिहन्तारो त्रायेतां नो रधूत्तमौ ॥ 19 ॥

आत्तसज्ज धनुषा विषुस्पृशा वक्षयाशुगनिषंगसंगिनौ ।
रक्षणाय मम रामलक्ष्मणा –
वग्रतः पथि सदैव गच्छताम् ॥ **20** ॥

संनध्धः कवची खड्गी चापवाणधरो युवा ।
गच्छन्मनोरथोश्माकम् रामः पातु सलक्ष्मणः ॥ **21** ॥

रामो दाशरथिः शूरो लक्ष्मणानुचरो बली ।
काकुतस्थः पुरुषः पूर्णः कौश्ल्येयो रधूत्तमः ॥ **22** ॥

वेदांतवेद्यो यज्ञेशः पुराण पुरुषोत्तमः ।
जानकीवल्लभः श्रीमान अप्रमेय पराकमः ॥ **23** ॥

इत्येतानि जपन्नितयं मद्भकतः श्रध्धयान्वितः ।
अश्वमेघाधिकं पुण्यं संप्रापनोति न संशयः ॥ **24** ॥

रामं दूर्वादलश्यामं पदमाशं पीतवाससम् ।
स्तुवंति नामभिर्दिव्यैर्न ते संसारिणो नराः ॥ **25** ॥

रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरं ।
काकुतस्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम् ॥
राजेन्द्रं सत्यसंधं दशरथतनयं श्यामलं शान्तमूर्तिं ।
वंदे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥ **26** ॥

रामाय रामभद्राय रामचंद्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ **27** ॥

श्रीराम राम रघुनंदन राम राम
श्रीराम राम भरताग्रज राम राम ।
श्रीराम राम रणकर्कश राम राम
श्रीराम राम शरणं भव राम राम ॥ **28** ॥

श्रीरामचंद्रचरणौ मनसा स्मरामि
श्रीरामचंद्रचरणौ वचसा गृणामि ।
श्रीरामचंद्रचरणौ शिरसा नमामि
श्रीरामचंद्रचरणौ शरणं प्रपद्ये ॥ **29** ॥

माता रामो मत्पिता रामचंद्र
स्वामी रामो मतसखा रामचंद्र ।
सर्वस्वं मे रामचंद्रो दयालु
र्नान्यं जाने नैव जाने न जाने ॥ **30** ॥

दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मज ।
पुरतो मारुतिर्यस्य तं वंदे रघुनन्दम् ॥ **31** ॥

लोकाभिरामं रणरंगधीरं राजीवनेत्रं रघुवंशनाथम् ।
कारुण्यरुपं करुणाकरं तं श्रीरामचन्द्रं शरणं प्रपद्ये ॥ **32** ॥

मनोजवं मारुततुल्यवेगं
जितेन्द्रियं बुध्धिमतां वरिष्ठम् ।
वातातमजं वानरयूथमुख्यं
श्रीरामदूतं शरणं प्रपद्ये ॥ **33** ॥

कूजन्तं रामरामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ **34** ॥

आपदामपहर्तारं दातारं सर्वसंपदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ **35** ॥

भर्जनं भवबीजानाम अर्जनं सुखसंपदाम् ।
तर्जनं यमदूतानां राम रामेति गर्जनम् ॥ **36** ॥

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुध्धर ॥ **37** ॥

राम रामेति रामेति रमे रामे मनोरमे ।
सहस्त्र नाम तत्तुल्यं रामनाम वरानने ॥ **38** ॥

**इति श्रीबुधकौशिकमुनिविरचितं श्रीरामरक्षास्तोत्रं संपूर्णम् ।**